# षष्ठाध्यायस्य चतुर्थः पादः

## अङ्गस्य। (१/२००)

अधिकारोऽयम् आसप्तमाध्यायपरिसमाप्तेः। यदित[1]ऊर्ध्वमनुक्रमिष्यामः अङ्गस्य इत्येवं तद् वेदितव्यम्। वक्ष्यति – 'हलः' (६.४.२/२५५९) – हूतः। जीनः। संवीतः[2]। अङ्गस्य इति किम्? निरुतम्। दुरुतम्। 'नामि दीर्घः' (६.४.६/२८९) – अग्नीनाम्। वायूनाम्। अङ्गस्य इति किम्? [3]क्रिमिणां पश्य। [4]पामनां पश्य। 'अतो भिस ऐस्' (७.१.९/२०३) – वृक्षैः। प्लक्षैः। अङ्गस्य इति किम्? ब्राह्मणभिस्सा। [5]ओदनभिस्सिटा (म. भा. ३. १७९)। अङ्गाधिकारः कृतोऽन्यार्थो नामि दीर्घत्वाद्यपि व्यवस्थापयति इति तदर्थम् अर्थवद्ग्रहणपरिभाषा (व्या.प. १) नाश्रयितव्या भवति।

अङ्गस्य इति सम्बन्ध[6]सामान्ये [7]एषा षष्ठी यथायोगं विशेषेषु अवतिष्ठते। अथ वा प्रातिपदिकार्थमात्रम् अविवक्षितविभक्त्यर्थम् अधिक्रियते। तत् उत्तरत्र यथायोगं विपरिणम्यते। ततोऽकारान्तादङ्गात् भिस ऐस् इत्येवमाद्यपि सम्यक् [8]सम्पन्नं भवति॥

## हलः। (२/२५५९)

[9]अङ्गावयवाद्धलो यदुत्तरं सम्प्रसारणं तदन्तस्याङ्गस्य दीर्घो भवति। हूतः। जीनः। संवीतः। हलः इति किम्? उतः। उतवान्। [10]अङ्गावयवात् इति किम्? निरुतम्। तदन्तस्य इति किम्? विद्धः। विचितः। [11]अणः इत्येव, तृतीयः। तृतीया (२.३.१८/५६१) इति वा निपातनादत्र दीर्घाभावः। अङ्गग्रहणमावर्तयितव्यम् हल्विशेषणार्थम्, अङ्गकार्यप्रतिपत्त्यर्थं च॥

## नामि। (३/२०९)

नाम् इति [12]एतत् षष्ठीबहुवचनम् आगतनुट्कं गृह्यते। तस्मिन् परतोऽङ्गस्य दीर्घो भवति। अग्नीनाम्। वायूनाम्। कर्तॄणाम्। [13]हर्तॄणाम्। अणः इत्येतदत्र निवृत्तम्। [14]आगतनुट्कग्रहणमुत्तरार्थम्, कृते च नुटि दीर्घप्रतिपत्त्यर्थम्। अन्यथा हि नुडेव न स्यात्।

नामि दीर्घ आमि चेत् स्यात् कृते दीर्घे न नुट् भवेत्।
वचनाद् यत्र तन्नास्ति नोपधायाश्च चर्मणाम् (म.भा. ३.१८२)॥

---

1. पञ्चपाद्याम् इत्यधिकम् फ. 2. शूनः इत्यधिकम् फ.ड. 3. क्रिमिणः क, क्रुमीणाम् ह. 4. पामना क. 5. ओदनभिस्सटा क. ह, ओदनभिस्सदा प.मं. 6. सामान्येन क. 7. षष्ठी सा ह.फ. 8. सिद्धम् फ. 9. हलः दीर्घः सम्प्रसारणस्य इति वर्तते इत्यधिकम् फ. ह. 10. अङ्गस्य फ. 11. अणः – दीर्घाभावः नास्ति फ. 12. एतत् नास्ति फ.ह. 13. नास्ति फ. 14. आगतनुट्कस्य ग्रहणम् फ.ह.